**647510** **MA04SanE501B** **Seat No :________**

# M.A. (SANSKRIT) Semester - 4 (*CBCS*) Examination
# March/April - 2025 (As Per Syllabus Year June-2019)
# Bramhasutra Shreebhashy(Elective-5)

**Time: 2:30 Hours** **Marks: 70**

**Instructions:**

1. All questions are compulsory.
2. Figures to the right indicate marks.

---

પ્રશ્ન-૧ કોઈ પણ બે પરિચ્છેદોનો અનુવાદ જરૂરી નોંધ સાથે કરો. (૧૪)

Que-1 Translate any two paragraphs with the required notes. (14)

(१) तदादौ प्रत्यक्षं हि प्रमाणं विवेच्यते । तच्च द्विविधं । इन्द्रियसंभवं योगसंभवं चेति । इन्द्रियसंभवं च बाह्यसंभवमान्तरसंभवं चेति द्विधा । बाह्येन्द्रियाणि विद्यमानसंनिकर्ष-योग्यस्वविषयबोधजननानीति सर्वार्थसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेष विषयबोधजननानि ।नाप्यनुमानं विशेषतो दृष्टं सामान्यतो दृष्टं वा । अतीन्द्रिये वस्तुनि सम्बन्धावधारणविरहान्न विशेषतो दृष्टम् ।

(२) अथ मोक्षोपाय: प्रदर्श्यते । तर्हि मोक्षोपलब्धि र्हि कथं साधयेदिति जिज्ञासायामुच्यते यत् - तत्र ब्रह्म ध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृत-विविधभेदाद्वितीयज्ञानैकरसब्रह्मरूप-मोक्ष: प्राप्यते । न च वाक्यात् वाकयार्थज्ञानमात्रेण ब्रह्मभावसिद्धि: । तथा च सति श्रवणादिविधानमनर्थकं स्यात् ।

(३) जन्मादीति,सृष्टिस्थितिप्रलयस्तद्गुणसंविज्ञानो बहुव्रीहि:। अस्याचिन्त्यविविध विचित्ररचनस्य नियतदेशकालफलभोग-ब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रस्य जगत:।यत: यस्मात्सर्वेशवरान्निखिलहेयप्रत्यनीकस्वरूपात्त् सत्यसंकल्पात् ज्ञानानन्दाद्यनन्तकल्याण-गुणात् सर्वज्ञात् सर्वशक्ते: परमकारुणिकात् परस्मात् पुंस: सृष्टिस्थितिप्रलया: वर्तन्ते, तत् ब्रह्मेति सूत्रार्थ:।

(४) "यतो वा इमानि भूतानि जायन्ते" इत्यादि कारणवाक्येन प्रतिपन्नस्य जगज्जन्मादिकारणस्य ब्रह्मण: सकलेतरव्यावृत्तम् स्वरूपमभिधीयते । "सत्यं ज्ञानमनन्तं ब्रह्म" इति । तत्र सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह । तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनश्च व्यावृत्त: ।

પ્રશ્ન-૨ કોઈ પણ બે પરિચ્છેદોનો અનુવાદ જરૂરી નોંધ સાથે કરો. (૧૪)

Que-2 Translate any two paragraphs with the required notes. (14)

(१) अथ ब्रह्म-प्राप्त्युपायं विवेचयन्नाह- एवं भूतं ब्रह्म कथं प्राप्यत इत्यपेक्षयां "ब्रह्मविदाप्नोति परम्" आत्मानमेव लोकमुपासीत्" इति वेदनादिशब्दैरूपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा "स्ववेश्मनिधिरस्ति" इति वाक्येन निधिसद्भावं ज्ञात्वा तृप्त: सन् पश्चादुपादाने च प्रवर्तते ।

(२) न च वक्यात् वाक्यार्थज्ञानमात्रेण ब्रह्मभावसिद्धि:,अनुपलब्धे: विविधभेददर्शनानुवृत्तेश्च । तथा च सति श्रवणादिविधानमनर्थकं स्यात्।अथोच्यते- "रज्जुरेषा न सर्प:" इत्युपदेशेन सर्पभयनिवृत्तिदर्शनात् रज्जुसर्पवत् बन्धस्य च मिथ्यारूपत्वेन ज्ञानबाध्यतया तस्यवाक्यजन्यज्ञानेनैव निवृत्तिर्युक्ता, न नियोगेन।नियोग साध्यत्वेमोक्षस्यानित्यत्वं स्यात् स्वर्गादिवत् । मोक्षस्य नित्यत्वं हि सर्ववादि , संप्रतिपन्नम् ।

(३) प्रतिसन्धानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापयति , नानुभूतिमात्रम् । अहमेवेदं , पूर्वमप्यन्वभुवमिति । भवतोऽप्यनुभूते र्नहि अनुभवितृत्वमिष्टम्, अनुभूतिरनुभूतिमात्रमेव । संविन्नाम काचिन्निराश्रया निर्विषया वा अत्यन्तानुपलब्धे र्न संभवतीत्युक्तम् । उभयाभ्युपेता संविदेवात्मेत्युपलब्धिपराहतम् ।

(४) तदा केन वा प्रकारेण बह्म-साक्षात्कार इति जिज्ञासायामुच्यते । तद् ब्रह्म हि ध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृत-विविधभेदाद्वितीयज्ञानैकरसब्रह्मरूप-मोक्ष: प्राप्यते । न च वाक्यात् वाकयार्थज्ञानमात्रेण ब्रह्मभावसिद्धि: । तथा च सति श्रवणादिविधानमनर्थकं स्यात् ।

પ્રશ્ન-3 श्रीभाष्यानुसारं "ब्रह्म-स्वरूपम्" स्पष्टयतु। (૧૪)

Que-3 Expalin the "ब्रह्म-स्वरूपम्" According to Shri-Bhashya (14)

અથવા / OR

પ્રશ્ન-3 "जन्माद्यस्य यत:" सूत्रमिदं श्रीभाष्यानुसारं स्पष्टयतु।

Que-3 Expalin the sutra "जन्माद्यस्य यत:" According to Shri-Bhashya.

પ્રશ્ન-૪ श्रीभाष्यानुसारं "मोक्ष-स्वरूपम्" स्पष्टयतु। (૧૪)

Que-4 Expalin the "मोक्ष-स्वरूपम्" According to Shri-Bhasya (14)

અથવા / OR

પ્રશ્ન-૪ श्रीभाष्यानुसारं भेदा-भेदवादं निरूपयतु।

Que-4 Expalin the "भेदा-भेदवादं" According to Shri-Bhashya

પ્રશ્ન-૫ કોઈ પણ બે પર ટૂંક નોંધ લખો. (૧૪)

Que-5 Write short note any two. (14)

(१) नियोग-विधि:

(२) જીવ – બ્રહ્મનો અભેદ

(३) सत्यं ज्ञानमनन्तं ब्रह्म

(४) प्रत्यक्ष-प्रमाण

****************